# shrI mArgasahAyalinga stutiH

# શ્રીમાર્ગસહાયલિઙ્ગસ્તુતી

## Document Information

Text title : mArgasahAyaliNgastutiH

File name : mArgasahAyalingastuti.itx

Category : shiva, stotra, appayya-dIkShita

Location : doc_shiva

Author : Sri Appayya Dixitar

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Latest update : June 19, 2004

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# shrI mArgasahAyalinga stutiH

# શ્રીમાર્ગસહાયલિઙ્ગસ્તુતી

॥ શ્રીમદ્ અપ્પય્યદીક્ષિતેન્દ્રૈઃ વિરચિતા ॥

પયો-નદીતીર નિવાસલિઙ્ગં બાલાર્ક-કોટિ પ્રતિમં ત્રિનેત્રમ્ ।
પદ્માસનેનાર્ચિત દિવ્યલિઙ્ગં વન્દામહે માર્ગસહાયલિઙ્ગમ્ ॥ ૧॥

ગઙ્ગાતરઙ્ગોલ્લસદુત્તમાઙ્ગં ગજેન્દ્ર-ચર્માંબર ભૂષિતાઙ્ગમ્ ।
ગૌરી-મુખાંભોજ-વિલોલ-ભૃઙ્ગં વન્દામહે માર્ગસહાયલિઙ્ગમ્ ॥ ૨॥

સુકઙ્કણીભૂત મહાભુજઙ્ગં સંજ્ઞાન-સંપૂર્ણ-નિજાન્તરઙ્ગમ્ ।
સૂર્યેન્દુ-બિંબાનલ-ભૂષિતાઙ્ગં વન્દામહે માર્ગસહાયલિઙ્ગમ્ ॥ ૩॥

ભક્તપ્રિયં ભાવવિલોલભૃઙ્ગં ભક્તાનુકૂલામલ ભૂષિતાઙ્ગમ્ ।
ભાવૈક-લોક્યાન્તરમાદિલિઙ્ગં વન્દામહે માર્ગસહાયલિઙ્ગમ્ ॥ ૪॥

સામપ્રિયં સૌમ્ય મહેશલિઙ્ગં સામપ્રદં સૌમ્ય-કટાક્ષલિઙ્ગમ્ ।
વામાઙ્ગ-સૌન્દર્ય-વિલોલિતાઙ્ગં વન્દામહે માર્ગસહાયલિઙ્ગમ્ ॥ ૫॥

પઞ્ચાક્ષરી-ભૂત-સહસ્રલિઙ્ગં પઞ્ચામૃતસ્નાન-પરાયણાઙ્ગમ્ ।
પઞ્ચામૃતાંભોજ-વિલોલ-ભૃઙ્ગં વન્દામહે માર્ગસહાયલિઙ્ગમ્ ॥ ૬॥

વન્દે સુરારાધિત-પાદપદ્મં શ્રીશ્યામવલ્લી-રમણં મહેશમ્ ।
વન્દે મહામેરુ-શરાસનં શિવં વન્દા સદા માર્ગસહાયલિઙ્ગમ્ ॥ ૭॥

॥ ઇતિ  શ્રી માર્ગસહાયલિઙ્ગ સ્તુતિઃ સંપૂર્ણા ॥

॥ ૐ તત્સત્ ॥

Encoded and proofread by
N. Balasubramanian bbalu@satyam.net.in

*shrI mArgasahAyalinga stutiH*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*